भज गोविन्दम्

मोह मुद्गरः

श्री आदि शङ्कर विरचित

भज गोविन्दं भज गोविन्दं

गोविन्दं भज मूढमते ।

संप्राप्ते सन्निहिते काले
नहि नहि रक्षति डुकृञ्करणे ॥ १ ॥

मूढ जहीहि धनागमतृष्णां

कुरु सद्बुद्धिं मनसि वितृष्णाम् ।

यल्लभसे निजकर्मोपात्तं
वित्तं तेन विनोदय चित्तम् ॥ २ ॥

नारीस्तनभरनाभीदेशं

दृष्ट्वा मागा मोहावेशम् ।

एतन्मांसावसादि विकारं
मनसि विचिन्तय वारं वारम् ॥ ३ ॥

नलिनीदलगतजलमतितरलं

तद्वज्जीवितमतिशयचपलम् ।

विद्धि व्याध्यभिमानग्रस्तं
लोकं शोकहतं च समस्तम् ॥ ४ ॥

यावद्वित्तोपार्जन सक्तः

तावन्निज परिवारो रक्तः ।

पश्चाज्जीवति जर्जरदेहे
वार्तां कोऽपि न पृच्छति गेहे ॥ ५ ॥

यावत्पवनो निवसति देहे
तावत्पृच्छति कुशलं गेहे ।
गतवति वायौ देहापाये
भार्या बिभ्यति तस्मिन्काये ॥ ६ ॥

बालस्तावत्क्रीडासक्तः
तरुणस्तावत्तरुणीसक्तः ।
वृद्धस्तावच्चिन्तासक्तः
परे ब्रह्मणि कोऽपि न सक्तः ॥ ७ ॥

का ते कान्ता कस्ते पुत्रः
संसारोऽयमतीव विचित्रः ।
कस्य त्वं कः कुत आयातः
तत्त्वं चिन्तय यदिदं भ्रान्तः ॥ ८ ॥

सत्सङ्गत्वे निस्स्ङ्गत्वं
निस्सङ्गत्वे निर्मोहत्वम् ।
निर्मोहत्वे निश्चलतत्त्वं
निश्चलतत्त्वे जीवन्मुक्तिः ॥ ९ ॥

वयसि गते कः कामविकारः
शुष्के नीरे कः कासारः ।
क्षीणे वित्ते कः परिवारः
ज्ञाते तत्त्वे कः संसारः ॥ १० ॥

मा कुरु धनजनयौवनगर्वं

हरति निमेषात्कालः सर्वम् ।

मायामयमिदमखिलं हित्वा
ब्रह्मपदं त्वं प्रविश विदित्वा ॥ ११ ॥

दिनयामिन्यौ सायं प्रातः

शिशिरवसन्तौ पुनरायातः ।

कालः क्रीडति गच्छत्यायुः
तदपि न मुञ्चत्याशावायुः ॥ १२ ॥

द्वादशमञ्जरिकाभिरशेषः

कथितो वैयाकरणस्यैषः ।

उपदेशो भूद्विद्यानिपुणैः
श्रीमच्छङ्करभगवच्छरणैः ॥ १२ (अ) ॥

काते कान्ता धनगतचिन्ता

वातुल किं तव नास्ति नियन्ता ।

त्रिजगति सज्जनसंगतिरेका
भवति भवार्णवतरणे नौका ॥ १३ ॥

जटिलो मुण्डी लुञ्छितकेशः

काषायाम्बरबहुकृतवेषः ।

पश्यन्नपि च न पश्यति मूढः
उदरनिमित्तं बहुकृतवेषः ॥ १४ ॥

अङ्गं गलितं पलितं मुण्डं

दशनविहीनं जातं तुण्डम् ।

वृद्धो याति गृहीत्वा दण्डं
तदपि न मुञ्चत्याशापिण्डम् ॥ १५ ॥

अग्रे वह्निः पृष्ठे भानुः
रात्रौ चुबुकसमर्पितजानुः ।
करतलभिक्षस्तरुतलवासः
तदपि न मुञ्चत्याशापाशः ॥ १६ ॥

कुरुते गङ्गासागरगमनं
व्रतपरिपालनमथवा दानम् ।
ज्ञानविहिनः सर्वमतेन
मुक्तिं न भजति जन्मशतेन ॥ १७ ॥

सुरमन्दिरतरुमूलनिवासः
शय्या भूतलमजिनं वासः ।
सर्वपरिग्रहभोगत्यागः
कस्य सुखं न करोति विरागः ॥ १८ ॥

योगरतो वा भोगरतोवा
सङ्गरतो वा सङ्गवीहिनः ।
यस्य ब्रह्मणि रमते चित्तं
नन्दति नन्दति नन्दत्येव ॥ १९ ॥

भगवद्गीता किञ्चिदधीता
गङ्गा जललव कणिकापीता ।
सकृदपि येन मुरारि समर्चा
क्रियते तस्य यमेन न चर्चा ॥ २० ॥

पुनरपि जननं पुनरपि मरणं

पुनरपि जननी जठरे शयनम् ।

इह संसारे बहुदुस्तारे
कृपयाऽपारे पाहि मुरारे ॥ २१ ॥

रथ्याकर्पटविरचितकन्थः

पुण्यापुण्यविवर्जितपन्थः ।

योगी योगनियोजित चित्तो
रमते बालोन्मत्तवदेव ॥ २२ ॥

कस्त्वं कोऽहं कुत आयातः

का मे जननी को मे तातः ।

इति परिभावय सर्वमसारं
विश्वं त्यक्त्वा स्वप्न विचारम् ॥ २३ ॥

त्वयि मयि चान्यत्रैको विष्णुः

व्यर्थं कुप्यसि मय्यसहिष्णुः ।

सर्वस्मिन्नपि पश्यात्मानं
सर्वत्रोत्सृज भेदाज्ञानम् ॥ २४ ॥

शत्रौ मित्रे पुत्रे बन्धौ

मा कुरु यत्नं विग्रहसन्धौ ।

भव समचित्तः सर्वत्र त्वं
वाञ्छस्यचिराद्यदि विष्णुत्वम् ॥ २५ ॥

कामं क्रोधं लोभं मोहं

त्यक्त्वाऽत्मानं भावय कोऽहम् ।

आत्मज्ञानविहीना मूढाः
ते पच्यन्ते नरकनिगूढाः ॥ २६ ॥

गेयं गीता नामसहस्रं
ध्येयं श्रीपतिरूपमजस्रम् ।
नेयं सज्जनसङ्गे चित्तं
देयं दीनजनाय च वित्तम् ॥ २७ ॥

सुखतः क्रियते रामाभोगः
पश्चाद्धन्तशरीरे रोगः ।
यद्यपि लोके मरणं शरणं
तदपि न मुञ्चति पापाचरणम् ॥ २८ ॥

अर्थमनर्थं भावय नित्यं
नास्ति ततः सुखलेशः सत्यम् ।
पुत्रादपि धनभाजां भीतिः
सर्वत्रैषा विहिता रीतिः ॥ २९ ॥

प्राणायामं प्रत्याहारं
नित्यानित्यविवेकविचारम्।
जाप्यसमेत समाधिविधानं
कुर्ववधानं महदवधानम् ॥ ३० ॥

गुरुचरणाम्बुज निर्भरभक्तः
संसारादचिराद्भव मुक्तः ।
सेन्द्रियमानस नियमादेवं
द्रक्ष्यसि निजहृदयस्थं देवम् ॥ ३१ ॥

भजगोविन्दं भजगोविन्दं

गोविन्दं भजमूढमते ।

संप्राप्ते सन्निहिते काले
नहि नहि रक्षति डुकृञ्करणे ॥ ३२ ॥

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇